Hiralal Mazumdar Memorial College for Women
LIBRARY
Dakshineswar, Kolkata – 700 035

# WEST BENGAL STATE UNIVERSITY

B.A. Programme 5th Semester Examination, 2021-22

## SANGDSE02T-SANSKRIT (DSE1)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या समाधेयाः – 2×5 = 10

(क) कविरहस्यं केन विरचितम् ? कविना किमर्थं ग्रन्थोऽयं विरचितः ?

(ख) कविरहस्ये कविना कीदृशाः धातवः प्रयुक्ताः ?

(ग) कृष्णराजः कुत्र प्रतिवसति स्म ? तत्स्थानं केन पवित्रीकृतमासीत् ?

(घ) कृष्णराजः अग्निं केन प्रकारेण पृणाति ? द्विजदेवताश्च केन प्रकारेण पृणति ?

(ङ) कृष्णराजस्य कानने वायुः किं किं करोति ?

(च) 'यो व्रीणाति जयश्रियम्' इत्यत्र कः कुत्र जयश्रियं व्रीणाति ? कुत्र च धर्मं वृणीते ?

(छ) 'ग्रन्थयति' 'ग्रथति' इत्यनयोः क्रियापदयोः किं वैचित्र्यम् ?

2. अधोलिखितेषु श्लोकेषु यथेच्छं द्वयं संस्कृतभाषया देवनागरीलिप्या च व्याख्येयम् – 5×2 = 10

(क) गोपायति क्षितिमिमां चतुरब्धिसीमां
पापाज्जुगुप्सत उदारमतिः सदैव।
वित्तं न गोपयति यस्तु वनीयकेभ्यो
धीरो न गुप्यति महत्यपि कार्य्यजाते॥

(ख) कायो न जीर्य्यति जृणाति न यस्य शक्ति-
र्नो जुर्य्यते भुजबलं न जिनाति तेजः।
यद्विद्विषां जरति चेतसि भोगतृष्णा
तेषां वपुंषि विपिनेषु च जारयन्ति॥

(ग) तपत्यादित्यवद्धाम्ना तप्यते यः परन्तपः।
तपते रिपुराष्ट्रञ्च तापयत्यहितं सताम्॥

(घ) यस्य पृथ्वी प्रसूतेऽर्थं धर्ममर्थः प्रसूयते।
प्रसौति विजयं धर्मः स च प्रसवति श्रियम्॥

## SECTION-B

3. अधःप्रदत्तेषु प्रश्नेषु द्वयोः प्रश्नयोः उत्तरं लेख्यम् – 10×2 = 20

(क) वेदादिषु सत्सु चतुर्वर्गफलप्राप्तये काव्यस्योपयोगोऽस्ति न वेति साहित्यदर्पणानुसारं समासेन विचार्यताम्। 10

(ख) 'वाक्यं स्याद्योग्यताकांक्षासत्तियुक्तः पदोच्चयः'– आचार्यविश्वनाथमतानुसारेण अस्य तात्पर्यं वैशद्येन लिखत। 10

(ग) आचार्यविश्वनाथमते का नाम व्यञ्जना ? तस्याः कति भेदाः ? सोदाहरणं वैशद्येन प्रतिपाद्यताम्। 2+1+7

(घ) विश्वनाथनये काव्यलक्षणं प्रतिपाद्य तत्स्वरूपं समासेन लिखत। 2+8

4. अधोदत्तेषु द्वयोः टीकां संस्कृतभाषया देवनागरीलिप्या च लिखत – 5×2 = 10

तात्पर्यवृत्तिः, लक्षणा, शान्तरसः, नायिका, महावाक्यम्।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——